[Taittirīya Śhākhāyāṁ Vividha Sarasvatī Mantrāḥa]

ॐ प्रणो॑ दे॒वी सर॑स्वती॒ वाजे॑भिर्वा॒जिनी॑वती । धी॒नाम॑वि॒त्र्य॑वतु ॥

ॐ praṇō dēvī saras'vatī vājēbhir'vājinīvatī |
dhīnāmavit'ryavatu || [KYV TS 1-8-22-3, 2-5-12-7, 3-1-11-9 & RVS 6-61-4]

आ नो॑ दि॒वो बृ॒हतः॒ पर्व॑ता॒दा सर॑स्वती यज॒ता ग॑न्तु य॒ज्ञम् ।

ā nō divō bṛhata[fp]' par'vatādā
saras'vatī yajatā gan'tu yaj'ñam |

हवं॑ दे॒वी जु॑जुषा॒णा घृ॒ताची॑ श॒ग्मां नो॒ वाच॑मुश॒ती शृ॑णोतु ॥

havan' dēvī jujuṣhāṇā ghṛtāchī śhag'mān' nō
vāchamuśhatī śhṛṇōtu || [KYV TS 1-8-22-4]

पावी॑रवी क॒न्या॑ चि॒त्रायुः॒ सर॑स्वती वी॒रप॑त्नी॒ धियं॑ धात् ।

pāvīravī kan'yā chit'rāyus' saras'vatī
vīrapat'nī dhiyan' dhā-te |

ग्नाभि॒रच्छि॑द्रꣳ शर॒णꣳ स॒जोषा॑ दुरा॒धर्षं॑ गृण॒ते शर्म॑ यꣳसत् ॥

gnābhirat'chhid'ragm' śharaṇagm' sajōṣhā
durādhar'ṣhaṅ' gṛṇatē śhar'ma yagm'sate || [KYV TS 4-1-11-10]

इ॒मा जु॒ह्वा॑ना यु॒ष्मदा॒ नमो॑भिः । प्रति॒ स्तोम॑ꣳ सरस्वति जुषस्व ।

imā juh'vānā yuṣh'madā namōbhiḥi |
pratis' stōmagm' saras'vati juṣhas'va |

तव॒ शर्म॑न् प्रि॒यत॑मे॒ दधा॑नाः । उप॑स्थेयाम शर॒णं न वृ॒क्षम् ॥

tava śhar'man' priyatamē dadhānā-ḥa |
upas'thēyāma śharaṇan' na vṛk'ṣham || [KYV TB 2-4-6-1]



www.Sai Veda.net

यस्ते स्तनश्-शशयो यो मयोभूः । येन विश्वा पुष्यसि वार्याणि ।
yas’tēs’ stanaśh’ śhaśhayō yō mayōbhū-ḥu ।
yēna viśh’vā puṣh’yasi vār’yāṇi ।

यो रत्नधा वसुविद्यस्-सुदत्रः । सरस्वति तमिह धातवेऽकः ॥
yō rat’nadhā vasuvid’yas’ sudat’raḥa ।
saras’vati tamiha dhātavē (a)kaḥa ॥ [KYV TA 4-8-2]

सरस्वत्यभि नो नेषि वस्यः । मा पस्फरीः पयसा मा न , आधक् ।
saras’vat’yabhi nō nēṣhi vas’yaḥa ।
mā pas’pharī[fp]’ payasā mā na , ādhake ।

जुषस्व नः सख्या वेश्या च । मा त्वत् क्षेत्राण्यरणानि गन्म ॥
juṣhas’va nas’ sakh’yā vēśh’yā cha ।
māt’ tvat’ kṣhēt’rāṇ’yaraṇāni gan’ma ॥ [KYV TB 2-4-3-1]

इयꣳ शुष्मेभिर्बिसखा इवारुजत् । सानु गिरीणां तविषेभिरूर्मिभिः ।
iyagm’ śhuṣh’mēbhir’bisakhā , ivārujate ।
sānu girīṇān’ taviṣhēbhirūr’mibhiḥi ।

पारावदघ्नीमवसे सुवृक्तिभिः । सरस्वतीमाविवासेम धीतिभिः ॥
pārāvadagh’nīmavasē suvṛk’tibhiḥi ।
saras’vatīmāvivāsēma dhītibhiḥi ॥ [KYV TB 2-8-2-8]

पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धिया वसुः ॥
pāvakā nas’ saras’vatī vājēbhir’vājinīvatī ।
yaj’ñaṁ’ vaṣh’ṭu dhiyā vasuḥu ॥ [KYV TB 2-4-3-1]

www.sanaveda.net

चो॒द॒यि॒त्री सू॒नृता॑नां॒ चेत॑न्ती सुमती॒नाम् । य॒ज्ञं द॑धे॒ सर॑स्वती ॥

chōdayit’rī sūnṛtānāñ’ chētan’tī sumatīnām ।
yaj’ñan’ dadhē saras’vatī ॥ [KYV TS 4-1-11-9]

शि॒वा नः॒ शन्त॑मा भव सुमृ॒डीका सर॑स्वति । मा ते॒ व्यो॑म सं॒दृशि॑ ॥

śhivā naśh’ śhan’tamā bhava sumṛḍīkā saras’vati ।
mā tēv’ vyōma san’dṛśhi ॥ [KYV TA 4-42-1]

ॐ शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥

www.Sai Veda.net